National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2022; 1(41): 232-235
© 2022 NJHSR
www.sanskritarticle.com

**Dr. Sonali Mukherjee,**
Assistant Professor,
Dept. of Sanskrit,
Seva Bharati Mahavidyalaya,
Kapgari, Jhargram

**Correspondence:**

**Dr. Sonali Mukherjee,**
Assistant Professor,
Dept. of Sanskrit,
Seva Bharati Mahavidyalaya,
Kapgari, Jhargram

# वैदिकसाहित्ये प्रतिबिम्बिताः पर्यावरणीय मूल्यबोधाः

**डॉ. सोनालीमुखार्जी**

**प्रमुखशब्दा** - पर्यावरणम्, वैदिकयुगम्, मूल्यबोधः, देवताः, ओषधयः, प्रार्थना

**भूमिका -**

**'मधुवाता ऋतायते मधुक्षरन्ति सिन्धवः।**
**माध्वीर्नः सन्त्वोषधीः॥'** (ऋग्वेद. १/९०/६)

इति मन्त्रे मानवजातेः कल्याणार्थम् अनुकूलपर्यावरणस्य प्रार्थना कृता अस्ति। पार्थिवपर्यावरणस्य वायुः, नद्यः, ओषधयः च सर्वेषां प्राणिनां हितकारिण्यः भवन्तु इति ऋषीणामभिप्रायः। 'पर्यावरण' इति शब्दः 'परि' पुर्वकात् आ पूर्वकात् √वृ धातोः ल्युट्(अन्)प्रत्ययेन अस्य व्युत्पत्त्यर्थः 'परितः आवरणम्' 'परिवेष्टनम्' वा। यत्किञ्चित् अस्मान् सर्वतः परिवेष्टयति तत्सर्वं पर्यावरणस्य अन्तर्गतं भवति। मनुष्याः, बृक्षाः, लताः, पशवः, पक्षिणः, कीटाः, चन्द्रः, सूर्यः, ग्रहाः, नक्षत्राणि, पर्वताः, समुद्राः, जलम्, आकाशः, वायुः, प्रभृतयः सर्वे मिलित्वा पर्यावररणं निर्मान्ति। अतः सजीव - अजीवयोः उभयोः तत्त्वयोः समन्वयेन पर्यावरणस्य निर्माणं भवति। प्राणः जगतः अमूल्यसंपत्तिः अस्ति। प्राणिनां जीवनरक्षनार्थमनुकूलपर्यावरणस्य आवश्यकता भवति। एतस्मादेव चिन्तनात् पर्यावरणस्य विविधोपादानानां सन्तुलनरक्षणविषये जागरुकता उत्पद्यते।

**पर्यावरणरक्षणस्य आवश्यकता -**

अस्मिन् परिवर्तनशीले जगति स्वाभाविकरूपेण नानाविधानि परिवर्तनानि भवन्ति। क्रमेण बहवः वनस्पतयः प्राणिनश्च विलुप्ताः अभवन्। किन्तु प्राकृतिकविनाशकारणेभ्यः अतिरिक्तं मानवकृतपरिवर्तनानां प्रभावेण पृथिवी शनैः शनैः निवासयोग्यता त्यक्त्वा विनाशमार्गे गच्छति।

अतः पृथिव्याः रक्षणं अस्माकं कर्त्यव्यं। जनसंख्यावृद्ध्या सह प्राकृतिकसम्पदां उपयोगः वर्धितः, किन्तु तासां सम्पदां वृद्धिः तथैव न जाता। अतः आवश्यकता पुरणार्थं मानवः अनेकान् उपायान् आविष्करोति ये पर्यावरणस्य कृते हानिकारकाः भवन्ति। पर्यावरणसन्तुलनस्य रक्षणार्थं सर्वैः सजागैः भवितव्यम्।

**वैदिकयुगे पर्यावरणसचेतना -**

प्रागैतिहासिकमानवसभ्यतायाः अनन्तरं वैदिकसभ्यतायाः उदयोऽभवत्। अद्यत्वे नगरीकरणेन उत्पन्नाः पर्यावरणसमस्याः वैदिकयुगे नासन्। वैदिकयुगादेव जनाः पर्यावरणरक्षण विषये

सजागाः नासन्। तस्मिन् काले मनुष्याः कृषिजन्यान्नेन, फलमूलैः, नदीजलैः च जीवननिर्वाहं कुर्वन्तः प्रकृतेरुपरि आश्रिताः आसन्। एषा आवश्यकतैव तान् प्राकृतिक पर्यावरणस्य संरक्षणाय प्रेरितवती।

**ऋग्वेदे देवभावनायां प्रतिबिम्बिताः पर्यावरणीयमूल्यबोधाः -**

वैदिकयुगे जनाः प्राकृतिकपदार्थान् देवतारूपेण चिन्तयन्ति स्म। ऋग्वेदे स्तुतानां देवतानां परीक्षणेन ज्ञायते यत् प्रत्येकस्य प्राकृतिकतत्त्वस्य अधिष्ठाता कश्चन देवः आसीत्। यथा - सूर्यः, सविता, आदित्यश्च दृश्यसूर्यस्य रूपेण कल्पिताः, अग्निः अग्नेः अधिष्ठाता, मरुतः, झञ्झावातस्य देवताः, रुद्रः विद्युतो वज्रस्य च देवता, अपः जलस्य अधिष्ठात्रीशक्तिः, पर्जन्यः मेघदेवता इति।

ऋग्वेदस्य मन्त्रेषु देवताभ्यः या स्तुतिः कृता दृश्यते, तस्य मूलाभिप्रायः अयं यत् प्राकृतिकपर्यावरणं सर्वेषां प्राणिनां जीवनोपयोगि भवेत्। प्रार्थनाभिः स्तुतिभिश्च वैदिकऋषयः प्राकृतिकसम्पदां संरक्षणे प्रवृत्ताः आसन्।

ऋग्वेदस्य दशममण्डले मन्त्रः अस्ति –

**'सूर्यो नो दिवस्पातु वातो अन्तरिक्षात् पातु अग्निः पार्थिवेभ्यः।'**

(ऋग्वेद. १०/१५८/१)

अर्थाद् द्युलोकसम्बद्धेभ्यः उपद्रवेभ्यः सूर्यः, अन्तरिक्ष-सम्बद्धेभ्यः दोषेभ्यः वायुः, पृथिवीसम्बद्धेभ्यः क्लेशेभ्यः अग्निः अस्मान् रक्षतु। ऋषयः ज्ञातवन्तः यत् बृक्षलतादयः दूषितवायोः कार्वनद्वयाम्लं गृथ्नन्ति तथा जीवनोपयोगिनम् अक्सिजेनं विसृजन्ति। अतः वायोः महत्त्वं ज्ञात्वा तस्य प्रति प्रार्थना कृता –

**'आ वात वाहि भेषजम् .... देवानां दूत ईयसे।'**

(ऋग्वेद. १०/१३७/३)

अर्थात् - हे वायो! अस्माकं हितकराणि भेषजानि आनय, अहितकराणि दूरं नय। त्वमेव संसारस्य भेषजरूपः असि। ऋग्वेदे जलं अमृतम् इति कथितम्। जलस्य अन्तः भेषजशक्तिः अस्ति। तेन जलं न केवलं तृष्णा निवारकं, अपि तु रोगनिवारकत्वेनापि ग्राह्यम्। यथा –

**'अपस्वन्तरमृतमप्सु भेषजम् .... ।'**

(ऋग्वेद. १/२३/१९)

**ऋग्वेदे अरण्यसंरक्षणगताः मूल्यबोधाः -**

पर्यावरणरक्षणस्य मुख्योपायेषु अरण्यसम्पदां संरक्षणमप्येकम्। ऋग्वेदस्य अरण्याणीसूक्ते पुनः पुनः वनरक्षणस्य महत्त्वं प्रतिपादितम्। वैदिकयुगे रोगोपाशमनार्थं बहुषु औषधीयेषु वनस्पतिषु आश्रयः आसीत्। रोगनिवारणशक्तियुक्तत्वात् ताः 'ओषधयः' इति कथिताः। ऋग्वेदस्य दशममण्डले सप्तनवतितमे सूक्ते ओषधीनां रक्षणविषये प्रार्थना दृश्यते –

**'अन्या बो अन्यामवत् .... ।'** (ऋग्वेद. १०/९७/१४)

अर्थाद् एका ओषधिः अपरस्याः रक्षणं करोतु। आवश्यकतावशात् ओषधीनां उपयोगः स्वीकृतः, किन्तु तासामकारणविनाशः निषिद्धः। अतो मन्त्रे प्रार्थना दृश्यते –

**'मा वो रिषत् खनिता यस्मै चाहं खनामि वः।**
**द्विपच्चतुष्पदस्माकं सर्वमस्त्वनातुरम्॥'**

(ऋग्वेद. १०/९७/२०)

**ऋग्वेदे पशुसंरक्षणगताः मूल्यबोधाः -**

पर्यावरणस्य सजीवोपादानेषु पशवः अपि महत्त्वपूर्ण-सम्पत्तिरूपेण परिगणिताः आसन्। वैदिकयुगे कृषिकर्माणि गोवर्गस्य विशेषोपयोगिता आसीत्। गो, अश्व, अजादयः धनसम्पदः इव मान्यन्ते स्म। ऋग्वेदे यजमानेन इन्द्रदेवतां प्रति गोसमृद्धेः तथा अन्नसमृद्धेः कामना कृता –

**'सं गोमदिन्द्र वाजवदस्मे पृथु श्रवो वृहत् .... ।'**

(ऋग्वेद. १/९/७)

ऋग्वेदे कुक्कुर, गर्दभ, मेष, गजादीनां दानस्य अपि उल्लेखः दृश्यते। पशूनां स्वास्थ्यरक्षणार्थं रुद्रदेवतायै प्रार्थना अपि कृता - *'इमा रुद्राय तवसे।'* अपि च –

**'यथा शमसद् द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम्।'**

(ऋग्वेद. १/११४/१)

अर्थाद् अस्माकं ग्रामे द्विपदाः चतुष्पदाः च सर्वे रोगरहिताः पुष्टाश्च भवन्तु। तथापि वैदिकसमाजे पशुरक्षणस्य सह पशुबलिप्रथा अपि दृश्यते। यज्ञादिषु पशुमांसस्य उपयोगः अभवन्। अतः पशुसंरक्षणं तथा पशुप्रयोगः उभौ तस्मिन् समाजे विद्यमानौ आस्ताम्।

**ऋग्वेदे पर्यावरणरक्षार्थकाः प्रार्थनाः -**

पर्यावरणं जीवनधारणे अनुकूलं भवेदिति उद्देश्येन वैदिकऋषिभिः बहवः मन्त्राः प्रणीताः। यथा –

**'मधुमतीरोषधीर्द्यावा आपो मधुमन्नो भवत्वन्तरिक्षम्।'**

(ऋग्वेद. ४/५७/३)

अन्यत्र ऋषयः पृथिवीम्, आकाशम्, रात्रिम्, उषसम्, वनस्पतीन्, सूर्यं, धेनून् च सर्वान् अनुकूलभावेन स्थितुं प्रार्थयन्ति।

**सामवेदे प्रतिबिम्बिताः पर्यावरणीय मूल्यबोधाः -**

यद्यपि सामवेदस्य बहवः मन्त्राः ऋग्वेदात् गृहीताः तथापि सामवेदे अपि पर्यावरणरक्षणचिन्तनस्य विशिष्टं स्थानमस्ति। ऋषिभिः क्षितिः, अपः, तेजः, मरुत्, व्योम - एतेषां पञ्चभूतानां समन्वयेन पर्यावरणस्य निर्माणम् इति स्वीकृतम्। विशेषतया वायोः महत्त्वं प्रतिपादयन मन्त्रः –

**'वात आ वातु भेषजं ... आयूंषि तारिषत्।'**

(सामवेद. १८४०)

अर्थाद् - हे वायो! त्वं भेषजवत् अस्माकं समीपं प्रवह, मानवानां दीर्घायुष्यम् आवह। अपरत्र वायुः पितृरूपेण, भ्रातृरूपेण, सखिरूपेण च सम्बोधितः –

**'उत वात पितासि न उत भ्रातोत नः सखा।**
**स नो जीवातवे कृधि।'** (सामवेद. १८४१)

सामवेदे द्युलोकस्य पृथिव्या सह संयुक्तरूपेण स्तुतिः अपि दृश्यते –

**'मन्ने वां द्यावापृथिवी सुभोजसौ ते नो मुञ्च ....।'**

(सामवेद. ६२२)

अत्र ऋषयः सुखं, कल्याणं, धनसमृद्धिं च प्रार्थयन्ति। अतः स्पष्टं भवति यत् सामवेदे पर्यावरणीयोपादानानि केवलं भौतिकसाधनानि न, किन्तु जीवनरक्षणस्य आध्यात्मिकाधार-रूपेण स्वीकृतानि।

**यजुर्वेदे प्रतिफलिताः पर्यावरणीय मूल्यबोधाः -**

यजुर्वेदे अपि प्राकृतिकतत्त्वानां दैवीस्वरुपे उपासना दृश्यते. अत्र सूर्यः प्रकाशस्य, तेजसः, विश्वप्रकाशनस्य च अधिष्ठाता इति प्रतिपादितः। चन्द्रस्य प्रकाशकारणत्वेन सूर्यस्य स्तुतिः दृश्यते –

**'स्वयम्भूरसि श्रेष्ठो रश्मिः .... मे देहि।'**

(शुक्लयजुर्वेद. २/२६)

यजुर्वेदे जलस्य विशेषमहत्वं प्रतिपादितम् जलं मातृरूपेण, आरोग्यप्रदम्, रोगनिवारकम्, अमृततुल्यं च परिगणितम्। जलदूषनस्य प्रतिषेधोऽपि स्पष्टतया दृश्यते –

**'मा अपो मौषधीर्हिंसीः।'** (शुक्लयजुर्वेद. ६/२२)

शुक्लयजुर्वेदे पृथिवी, अन्तरिक्षम्, द्युलोकः, सूर्यः, चन्द्रः, वनस्पतयः, सरिसृपाः इत्यादयः सर्वे समभावेन आदृताः –

**'पृथिव्यै स्वाहा. अन्तरिक्षाय स्वाहा. दिवे स्वाहा. सूर्याय स्वाहा. चन्द्राय स्वाहा .... वनस्पतिभ्यः स्वाहा ... सरीसृपेभ्यः स्वाहा।'** (शुक्लयजुर्वेद २२/२९)

एतेन ज्ञायते यत् समग्रं जगत् परस्परावलम्बिततत्त्व - समुहरूपेण चिन्तितम्।

**यजुर्वेदे दैवभावनायाः पर्यावरणसंरक्षणदृष्टिः -**

यजुर्वेदीयदृष्ट्या पर्यावरणस्य विविधोपादानि देवतारूपेण ग्राह्याणि। अतः तेषां प्रति श्रद्धा, उपयोगे संयमः, संरक्षणे सजगता च प्रतिपादिता। प्रकृतेः उग्रशक्तीनां शमनार्थं ऋषिभिः शान्तिप्रार्थना कृता –

**'द्यौः शान्तिरन्तरिक्षं शान्तिः पृथिवी शान्तिः ... वन्स्पतयः शान्तिः, ... सर्वं शान्तिः ... सा मा शान्तिरोध।'**

(शुक्लयजुर्वेद. ३६/१७)

अयं मन्त्रः आधुनिकपर्यावरणसन्तुलनस्य दृष्ट्या अपि अत्यन्तं प्रासङ्गिकः।

**यजुर्वेदे उद्भिद्रक्षणगताः मूल्यबोधाः -**

यद्यपि औषधीयवनस्पतीनां उपयोगः रोगनिवारणार्थं क्रियते स्म, तथापि तासां पुनर्विकासाय प्रार्थना अपि दृश्यते -

**'दीर्घायुस्त ओषधे खनिता यस्मै च त्वा खनाम्यहम्।'**

**अपि च 'अथो त्वं दीर्घायुर्भूत्वा शतबला विरोहतात्।'**

(शुक्लयजुर्वेद. १२/१००)

वनस्पतयः देवतुल्याः इति भावना यजुर्वेदे विशेषेण दृश्यते –

**'नमो वृक्षेभ्यः, वनानां पतये नमः, वृक्षाणां, पतये नमः, अरण्यानां पतये नमः।'** (शुक्लयजुर्वेद. १६/१७ - २०)

एते मन्त्राः प्रकृतिं प्रति आदरस्य सांस्कृतिकं स्वरुपं प्रकाशयन्ति।

**यजुर्वेदे पशुरक्षणगताः मूल्यबोधाः -**

यजुर्वेदे ग्राम्यपशवः अरण्यपशवश्च उभौ वर्णितौ। यद्यपि यज्ञादिषु पशुप्रयोगः कदाचित् अभवत्, तथापि पशुरक्षणस्य भावना अपि समानरूपेण विद्यमाना आसीत्। अग्निदेवतां प्रति प्रार्थना दृश्यते –

**'शंस्य पशुन्मे पाहि।'**

(शुक्लयजुर्वेद. ३/३७)

मानवैः पशु - वृक्षादीनां प्रति कृतदोषानां परिहारार्थमपि प्रार्थना दृश्यते। एषा भावना पर्यावरणनैतिकतायाः प्राचीनरूपमिव दृश्यते। यजुर्वेदीय परम्परायां पञ्चमहायज्ञेषु 'भूतयज्ञः' विशेषमहत्त्वयुक्तः। सर्वभूतानां प्रति अन्नदानं, कल्याणकामना, सहअस्तित्वबोधश्च अस्य मूलतत्त्वानि सन्ति।

**अथर्ववेदे प्रतिफलिताः पर्यावरणीय मूल्यबोधाः -**

पूर्वोक्त वेदत्रयस्य अपेक्षया अथर्ववेदः सामाजिक जीवनस्य,

लौकिकानुभवस्य, प्रकृतिसम्बन्धस्य चाधिकं समीपवर्ती ग्रन्थः मन्यते। अत्र मानवजीवनस्य नानाविधविषयेषु पर्यावरणस्य प्रत्यक्षं महत्त्वं प्रतिपादितम्।

**अथर्ववेदे देवभावनायां पर्यावरणदृष्टिः -**

अथर्ववेदे द्यावापृथिव्यौः परस्परसम्बन्धरूपं विशेषतया निरुपितम्। पृथिवी मातृरूपेण, द्युलोकः पितृरूपेण च प्रतिपादितौ। ऋषयः प्रार्थयन्ते यत् पृथिवी सर्वेषां प्राणिनां जीवनधारिणी भूत्वा आरोग्यं स्थैर्यं, कल्याणं च ददातु। भूमिसूक्तो पृथिव्याः वैश्विकजीवनाधारत्वं वर्णितम् -

**'स नो भूमिः प्राणमायुर्दधातु।'** (अथर्ववेद. १२/१/१/२२)

**जलसंरक्षणं तथा आरोग्यदृष्टिः -**

अथर्ववेदे जलं केवलं द्रवरूपपदार्थः न, अपि तु रोगनाशकशक्तियुक्तम् अमृततुल्यं तत्त्वम्। ऋषिः प्रार्थयते -

**'आपः पुनीत भेषजम् वरुथं तम्वे मम ... दृशो।'**

(अथर्ववेद. १/१/६/३)

अत्र पर्यावरणीय स्वासथ्यदृष्टेः प्राचीनं रूपं दृश्यते।

**उद्भिदरक्षणम् -**

अथर्ववेदे तिल, व्रीहि, यव, माष, इक्षु, जम्बु, पलाशादीनां उल्लेखः दृश्यते। मानवजीवने उपयोगित्वमस्ति इति कारणेन वनस्पतीनां रक्षणीयता स्वीकृता। उपयोगः तथा संरक्षणम् - उभयं समन्वितरूपेण दृष्टम्। यथा -

**'दशवृक्ष मुञ्चे मां रक्षसो ग्राह्याः... ।'**

(अथर्ववेद. २/२/४/१)

**पशुरक्षणम् -**

कृषिप्रधाने समाजे पशवः अर्थजीवनस्य मुलाधाराः आसन्। अतः ऋषयः प्रार्थयन्ति –

**'इहैतु सर्वो वः पशुःरस्मिन् तिष्वतु या रयिः।'**

(अथर्ववेद. १/३/४/२)

तथा –

**'सं सं स्रवन्तु पशवः .... समश्वाः समु पुरुषाः।'**

(अथर्ववेद. २/४/९/३)

गोजार्तिं प्रति विशेषश्रद्धा अपि दृश्यते। अरण्यपशुनामपि रक्षणं भूमिसूक्ते प्रर्थितम्। एतत् जैववैविध्यसंरक्षणस्य प्राचीनचिन्तनमिति वक्तुं शक्यते।

**वैदिकसाहित्ये पर्यावरणीय मूल्यबोधाः -**

प्रत्यक्षतया 'संरक्षण' इति आधुनिक शब्देन निरूपितो न दृश्यते, किन्तु प्रकृतिं प्रति आदरः, संयमितोपयोगः, सहअस्तित्वबोधः, जीवसमन्वयः च सर्वत्र प्रतिपादिताः। वेदेषु प्रकृतिः न जड़वस्तु, न केवलं उपभोग्यसाधनम्, सा जीवनस्य सहचारिणी, देवतास्वरुपिणी, पोषिका च। अतः आधुनिकपर्यावरणनैतिकतायाः मूलतत्त्वानि - स्थायिविकासः, जैववैविध्यरक्षणम्, जलसंरक्षणम्, पर्यावरणन्यायः - एतेषां वीजरूपाणि वैदिकसाहित्ये द्रष्ट्युं शक्यन्ते।

**उपसंहार -**

परिशीलनात् ज्ञायते यत् वैदिकसाहित्ये पर्यावरणीय मूल्यबोधः बहुआयामिकः आसीत्। प्रकृतिपूजा, जलसंरक्षणम्, वनसंरक्षणम्, ओषधिसंरक्षणम्, पशुसंरक्षणम् इत्यादीनां माध्यमेन ऋषयः मानवजीवनस्य प्रकृतिनिर्भरस्वरुपं प्रकाशितवन्तः।

अद्यतनपर्यावरणसंकटस्य परिप्रेक्ष्ये एते वैदिकविचाराः पुनर्विमर्शयोग्याः सन्ति। विज्ञानस्य प्रगतेः सह यदि नैतिकदृष्टिः न भवति तर्हि मानवसभ्यता संकटं प्राप्नोति। अतः वैदिकपर्यावरणचिन्तनं न केवलं ऐतिहासिकमहत्त्वयुक्तम्, अपि तु भविष्यन्मुखी जीवनदर्शनरूपेणापि ग्राह्यम्।

**संदर्भसूची**


1) घोषः, विद्युतवरणः, (२०११), संस्कृतरचनायां प्रतिफलितं पर्यावरणसचेतनतत्वम्, (द्वितीयसंस्करणम्), संस्कृतपुस्तक-भाण्डारः।
2) वन्दोपाध्यायः, धीरेन्द्रनाथः, (२००९), संस्कृतसाहित्यस्य इतिहासः, पश्चिमवङ्ग - राज्य - पुस्तक – पर्षदः।
3) बसुः, योगिराजः (१९९३), वेदपरिचयः, फार्मा. के. एल्. एम्. प्राइभेट् - लिमिटेड्, कोलकाता।
4) भट्टाचार्यः, भवानीप्रसादः, अधिकारी, तारकनाथः, (२००१), वैदिकसंकलनम्, (१, २ खण्डः), संस्कृत - वुक – डिपो।
5) भट्टाचार्यः, विष्णुपदः, वैदिकदेवताः।
6) भट्टाचार्यः, सुकुमारी, (१३९४), प्राचीन - भारत - समाज ओ साहित्य, आनन्द पाव्लिशार्स।
7) शर्मा, दुर्गादासः, लाहिड़ी, (१३३२), अथर्ववेद - संहिता, (१ - ५ खण्डः)।
8) -, -, -, ऋग्वेदसंहिता।
9) -, -, -, शुक्लयजुर्वेदसंहिता, (२००१), चौखाम्वा - संस्कृत - संस्थान, वाराणसी।